Total Pages—6

UG/I/SANS/H/II/16(New)

# 2016

## SANSKRIT

## [Honours]

## PAPER – II

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

[NEW SYLLABUS]

1. स्वप्नवासवदत्तमिति रूपकस्य नामकरणस्य याथार्थ्यं निरूप्यताम् । 10

*अथवा*

नाटकानुसारेण वासवदत्तायाः चरित्रचित्रणं कुरु ।

( *Turn Over* )

2. अधोलिखितानां पद्यानामेकतरं सुरगिरा व्याख्येयम् (देवनागर्या लिख्यताम् )— 8

(*a*) सविश्रामो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः ।
तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः ।।

(*b*) अनेन परिहासेन व्यक्षिप्तं मे मनस्त्वया ।
ततो वाणी तथैवेयं पूर्वाभ्यासेन निःसृता ।।

3. अधोलिखितेषु प्रश्नषट्कं सुरगिरा देवनागर्या च समाधेयम्— 1 × 6

(*a*) का आसीद् 'वसुन्धरा' ?

(*b*) "स्वप्नवासवदत्तमिति नाटके विदूषकस्य नाम किम् ?

(*c*) पद्मावती का आसीत् ?

(*d*) ब्रह्मचारी कः आसीत् ?

(*e*) 'स्वप्नवासवदत्तम्' इत्यस्य व्युत्पत्तिः का ?

(*f*) 'धन्या सा स्त्रीयां तथा वेत्ति भर्त्ता' —वक्ता कः ?

(*g*) महासेनः कः ?

4. अधोलिखितानां त्रयाणां प्रकृतिप्रत्ययौ लेखनीयौ— 2 × 3

दत्तम्, अवधूय, वारयसि, अपवादः ।

5. अभिज्ञानशकुन्तलमाश्रित्य शकुन्तलायाः चरित्रचित्रणं करोतु । 12

*अथवा*

हस्तिवृत्तान्तस्य तात्पर्यं निरूप्यताम् ।

6. निम्नलिखितेषु पद्यमेकं सुरगिरा व्याख्येयम् (देवनागर्या लिख्यताम् ) — 8

(*a*) सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।।

(*b*) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ।।

7. अधस्तनेषु एकतरस्य सुरगिरा भावसम्प्रसारणं कार्यम् (देवनागर्या लिख्यताम्) — 4

(*a*) न प्रभातरलं ज्योतिरुदेति वसुधातलात्

(*b*) तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां ।
लोको नियम्यत इवैष दशान्तरेषु ।।

**8.** निम्नलिखितेषु प्रश्नेषु <u>द्वादशानामुत्तरं</u> प्रदीयताम् (सुरगिरा देवनागर्या लिख्यताम्) — 1 × 12

(*a*) 'अभिज्ञानशकुन्तलम्' इति नाटकस्य रचयिता कः ?

(*b*) 'अभिज्ञानशकुन्तलम्' इति नाटकस्य टीकाकारस्य नाम लिखत ।

(*c*) अभिज्ञानशकुन्तलमिति नाटकस्य मङ्गलाचरणे कस्य देवस्य स्तुतिः दृश्यते ?

(*d*) अभिज्ञानशकुन्तलमिति नाटके कुलपतेः नाम किम् ?

(*e*) न खलु न खलु वाणः सन्निपात्योऽयमस्मिन्
.................. अस्मिन्
श्लोके कस्य वृत्तस्य प्रयोगः दृश्यते ?

(*f*) का आसीत् हंसपदिका ?

(*g*) कस्य नाम माधव्य आसीत् ?

(*h*) अभिज्ञानशकुन्लमिति नाटकस्य उत्सः कः ?

(*i*) अभिज्ञानशकुन्तलमिति पदस्य विग्रहवाक्यं लिखत ?

(*j*) अभिज्ञानशकुन्तलमिति नाटकस्य नायकः कः ?

(*k*) 'पुत्रमेवं गुणोपेतं चक्रवर्तिनमाप्नुहि' — कः कम् उवाच ?

(*l*) 'ततो गण्डस्योपरि पिण्डकः संवृत्तः ? — कः कदा उवाच ?

(*m*) दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः — अत्र 'वनलता' शब्दस्य अर्थः कः ?

(*n*) भरतस्य परिचयः कुत्र विद्यते ?

(*o*) मेनका कस्याः माता आसीत् ?

9. अधोलिखितानां चतुर्णां प्राकृतपदानां संस्कृतरूपं लिख्यताम् — 4

अणसूए, तदो, होहि, तादिसा, तादो, कहंविअ, हद्धी हद्धी, ण हु सउन्दला ।

10. प्रस्तावनाविषये आचार्यविश्वनाथस्य मतं संक्षेपेणालोच्यताम् । 10

*अथवा*

अर्थोपक्षेपकस्य भेदविषये समासतः आलोच्यताम् ।

11. विषयमेकमाश्रित्य टीका लेख्या — 5

नान्दी, पताकास्थानम् , पूर्वरङ्गः

12. अधोलिखितेषु पञ्च प्रश्नाः समाधेयाः (सुरगिरा देवनागर्या) — 1 × 5

(*a*) रूपकाणि कतिविधानि ?

(*b*) सूत्रधारस्य लक्षणं किम् ?

(*c*) 'वाक्यं रसात्मकं काव्यम्' – कः उवाच ?

(*d*) नाटकस्य किमुदाहरणम् ?

(*e*) रसाः कतिविधाः ?

(*f*) नाट्यशास्त्रस्य रचयिता कः ?

(*g*) प्रहसनस्य किमुदाहरणम् ?

———